# শনৈশ্চরস্তবরাজঃ

{॥ শনৈশ্চরস্তবরাজঃ ॥}

শ্রী গণেশায নমঃ ॥

নারদ উবাচ ॥

ধ্যাত্বা গণপতিং রাজা ধর্মরাজো যুধিষ্ঠিরঃ ।
ধীরঃ শনৈশ্চরস্যেমং চকার স্তবমুত্তমম ॥ ১॥

শিরো মেং ভাস্করিঃ পাতু ভালং ছাযাসুতোঽবতু ।
কোটরাক্ষো দৃশৌ পাতু শিখিকণ্ঠনিভঃ শ্রুতী ॥ ২॥

ঘ্রাণং মে ভীষণঃ পাতু মুখং বলিমুখোঽবতু ।
স্কন্ধৌ সংবর্তকঃ পাতু ভুজৌ মে ভযদোঽবতু ॥ ৩॥

সৌরির্মে হৃদযং পাতু নাভিং শনৈশ্চরোঽবতু ।
গ্রহরাজঃ কটিং পাতু সর্বতো রবিনন্দনঃ ॥ ৪॥

পাদৌ মন্দগতিঃ পাতু কৃষ্ণঃ পাত্বখিলং বপুঃ ।
রক্ষামেতাং পঠেন্নিত্যং সৌরের্নামবলৈর্যুতাম্ ॥ ৫॥

সুখী পুত্রী চিরায়ুশ্চ স ভবেন্নাত্র সংশয়ঃ ।

সৌরিঃ শনৈশ্চরঃ কৃষ্ণো নীলোৎপলনিভঃ শনিঃ ॥ ৬॥

শুষ্কোদরো বিশালাক্ষো দুর্নিরীক্ষ্যো বিভীষণঃ ।

শিখিকণ্ঠনিভো নীলশ্ছায়াহৃদয়নন্দনঃ ॥ ৭॥

কালদৃষ্টিঃ কোটরাক্ষঃ স্থূলরোমাবলীমুখঃ ।

দীর্ঘো নির্মাংসগাত্রস্তু শুষ্কো ঘোরো ভয়ানকঃ ॥ ৮॥

নীলাংশুঃ ক্রোধনো রৌদ্রো দীর্ঘশ্মশ্রুর্জটাধরঃ ।

মন্দো মন্দগতিঃ খংজো তৃপ্তঃ সংবর্তকো যমঃ ॥ ৯॥orঅতৃপ্তঃ

গ্রহরাজঃ করালী চ সূর্যপুত্রো রবিঃ শশী ।

কুজো বুধো গুরূঃ কাব্যো ভানুজঃ সিংহিকাসুতঃ ॥ ১০॥

কেতুর্দেবপতির্বাহুঃ কৃতান্তো নৈঋতস্তথা ।

শশী মরূৎকুবেরশ্চ ঈশানঃ সুর আত্মভূঃ ॥ ১১॥

বিষ্ণুর্হরো গণপতিঃ কুমারঃ কাম ঈশ্বরঃ ।

কর্তা হর্তা পালয়িতা রাজ্যভুগ্ রাজ্যদায়কঃ ॥ ১২ ॥orরাজ্যেশো

ছায়াসুতঃ শ্যামলাঙ্গো ধনহর্তা ধনপ্রদঃ ।

ক্রূরকর্মবিধাতা চ সর্বকর্মাবরোধকঃ ॥ ১৩॥

তুষ্টো রুষ্টঃ কামরূপঃ কামদো রবিনন্দনঃ ।

গ্রহপীডাহরঃ শান্তো নক্ষত্রেশো গ্রহেশ্বরঃ ॥ ১৪ ॥

স্থিরাসনঃ স্থিরগতির্মহাকাযো মহাবলঃ ।

মহাপ্রভো মহাকালঃ কালাত্মা কালকালকঃ ॥ ১৫॥

আদিত্যভযদাতা চ মৃত্যুরাদিত্যনংদনঃ ।

শতভিদ্রুক্ষদযিতা ত্রযোদশিতিথিপ্রিযঃ ॥ ১৬॥

তিথ্যাত্মা তিথিগণনো নক্ষত্রগণনাযকঃ ।orতিথ্যাত্মকস্তিথিগণো

যোগরাশির্মুহূর্তাত্মা কর্তা দিনপতিঃ প্রভুঃ ॥ ১৭॥

শমীপুষ্পপ্রিযঃ শ্যামস্ত্রৈলোক্যাভযদাযকঃ ।

নীলবাসাঃ ক্রিযাসিন্ধুর্নীলাঞ্জনচযচ্ছবিঃ ॥ ১৮॥

সর্বরোগহরো দেবঃ সিদ্ধো দেবগণস্তুতঃ ।

অষ্টোত্তরশতং নাম্নাং সৌরেশ্ছাযাসুতস্য যঃ ॥ ১৯॥

পঠেন্নিত্যং তস্য পীডা সমস্তা নশ্যতি ধ্রুবম্ ।

কৃত্বা পূজাং পঠেন্মর্ত্যো ভক্তিমান্যঃ স্তবং সদা ॥ ২০॥

বিশেষতঃ শনিদিনে পীডা তস্য বিনশ্যতি ।

জন্মলগ্নে স্থিতির্বাপি গোচরে ক্রূররাশিগে ॥ ২১॥

দশাসু চ গতে সৌরে তদা স্তবমিমং পঠেত্ ।

পূজযেদ্যঃ শনিং ভক্ত্যা শমীপুষ্পাক্ষতাম্বরৈঃ ॥ ২২ ॥

বিধায লোহপ্রতিমাং নরো দুঃখাদ্বিমুচ্যতে ।

বাধা যাঽন্যগ্রহাণাং চ যঃ পঠেত্তস্য নশ্যতি ॥ ২৩॥

ভীতো ভযাদ্বিমুচ্যেত বদ্ধো মুচ্যেত বন্ধনাত্ ।

রোগী রোগাদ্বিমুচ্যেত নরঃ স্তবমিমং পঠেত্ ॥ ২৪ ॥

পুত্রবান্ধনবান্ শ্রীমান্ জাযতে নাত্র সংশযঃ ॥ ২৫॥

নারদ উবাচ ॥

স্তবং নিশম্য পার্থস্য প্রত্যক্ষোঽভূচ্ছনৈশ্চরঃ ।

দত্ত্বা রাজ্ঞে বরঃ কামং শনিশ্চান্তর্দধে তদা ॥ ২৬॥

॥ ইতি শ্রী ভবিষ্যপুরাণে শনৈশ্চরস্তবরাজঃ সম্পূর্ণঃ ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

Stotram Digitalized By Sanskritdocuments.org

Please send corrections to sanskrit@cheerful.com

Last updated ডoday

http://sanskritdocuments.org

Shanaishchara Stavaraja Lyrics in Bengali PDF
% File name : shanaishcharastava.itx
% Location : doc_z_misc_navagraha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://www.webdunia.com
% Proofread by : N.A.
% Description-comments : bhaviShyapurANa
% Latest update : February 22, 2003
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website